International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(6): 01-04
© 2020 IJSR
www.anantaajournal.com
Received: 01-09-2020
Accepted: 05-10-2020

**सुप्रतीक-मण्डल**
विद्यार्थी, रामकृष्णमिशन्,
विद्या मन्दिरस्य, वेलुडमठः, नई
दिल्ली, भारत

# विश्वनाथकृतकाव्यलक्षणस्य यौक्तिकताविचारः

**सुप्रतीक-मण्डल**

**प्रस्तावना**

"चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते" ॥ इति।
(साहित्यदर्पणः- १.२)

काव्यशास्त्रं न केवलं काव्यशास्त्रम्, अपितु काव्यलोचन-काव्यमीमांसा-साहित्यशास्त्र-साहित्यसिद्धान्तादिना परिचीयते काव्यिकमहले । काव्यस्य नियमसमूहम् अधिकृत्य आलोच्यते यत्र तदेव काव्यशास्त्रम् इत्युच्यते। अस्याः पृथिव्याः सर्वत्रैव सुप्राचीनकालादेव उपस्थितानां काव्यानुरागिजनानां हस्तकमलेन काव्यशास्त्रस्य विचारविवेचनानुसन्धानादिकार्याणि अभवन्, अधुनापि भवति उत्तरोत्तरकालेऽपि च भविष्यति।

भारतीयकाव्यशास्त्रस्य शुभारम्भं भवति आचार्यभरतमुनिविरचितनाट्यशास्त्रात्, इत्येवं मन्यते। एवं तु श्रूयते यत्, अस्माकमिदं भारतवर्षे भरतमुनेः प्रागपि वहवः काव्यशास्त्रकारा आसन् । किन्तु तेषां ग्रन्थसमूहं नोपलभ्यते । तथाहि काव्यशास्त्रालोचनाकाले आदौ भरताचार्यस्य नाट्यशास्त्रस्यैव प्रसङ्गम् आगच्छति। इदं कारणमाधारिकृत्य वक्तुं शक्यते, भरतमुनिरेव काव्यशास्त्रस्य तथा साहित्यशास्त्रस्य सर्वप्रथमालंकारिकस्तथा कविरिति।

**"वाक्यं रसात्मकं काव्यम्" ॥ इति। (साहित्यदर्पणः-१.२३)**

इदमेव काव्यलक्षणमाधारिकृत्य अस्य लक्षणस्य तात्त्विकदृष्ट्या तथ्यभित्तिकालोचना-इत्ययं मुख्यविषयत्वेन निर्वाचितो भवति।

**पूर्ववर्तिनामाचार्याणां मतखण्डनम्-**

"धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिषेवनम्" ॥ इति।
( साहित्यदर्पणः- १.३ )

काव्यतः धर्मार्थकाममोक्षरूपाणि चतुर्वर्गफलप्राप्तिर्भवति एतत्तु सत्यम् । अपितु, एक एव शब्दः सम्यकतया ज्ञातो भवति सुप्रयुक्तश्च भवति तर्हि स्वर्गे लोके च कामधुग् भवतीति

Corresponding Author:
**सुप्रतीक-मण्डलः**
विद्यार्थी, रामकृष्णमिशन्,
विद्या मन्दिरस्य, वेलुडमठः, नई
दिल्ली, भारत

श्रुतिः। सम्यग् ज्ञानस्य शब्दस्य श्रीनारायणचरणारविन्दस्तवादिना सुप्रयोगात् धर्मप्राप्तिः अवश्यमेव सिद्धति ।
काव्यस्योपादेयत्वविषये अग्निपुराणे एकः श्लोकोरस्ति । तत्र उच्यते-

"नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा" ॥ इति ।
( साहित्यदर्पणः- १.६ )

इत्यस्मिन् अंशे प्रकृतपक्षे वेदादिशास्त्रतः काव्यस्य विशिष्टतां तथा आकर्षणीयतां पृथग्रूपेन प्रतिपादनस्य प्रयासः क्रियेते । यतः , काव्यस्य एतादृशम् उपादेयत्वं प्रकाश्यते । तथाहि अधुना काव्यस्य स्वरूपप्रसङ्गे किञ्चिद् आलोच्यते । काव्यस्य किं स्वरुपम् ?-इत्यस्मिन् विषये मम्मटाचार्य

आह-
"तददोषौ शब्दार्थौ सगुणावलंकृती पुनः क्वापि" ॥ इति ।
(काव्यप्रकाशः- १.१)

काव्यप्रकाशस्य प्रथमोल्लासे उल्लिखितेऽस्मिन् काव्यलक्षणे शब्दार्थौ एव मुख्यतया परिगणितौ । परन्तु तौ शब्दार्थौ न केवलं साधारणौ । तौ च दोषरहितौ । माधर्यादिगुणयुक्तौ कदाचिच्च् स्फुटालंकारसहितौ ।
परन्तु केवलं शब्दार्थेन काव्यत्वं न भवति । यदि तद्भवेत् तर्हि साधारणवाक्येन सह काव्यस्य पार्थक्यं कुत्र ? अपि च, 'अनलंकृती पुनः क्वापि'- इत्येवं लक्षणं न युक्तियुक्तम् । 'सर्वत्र सालंकारौ'- इत्येतत् यदि कवेः अभिप्रायः , तर्हि सुस्पष्टतया 'सालंकारौ'-इति विशेषणं तेन कथं न प्रदीयते ?-इत्येवं प्रकारेण मम्मटस्य काव्यलक्षणे दोषमुपस्थापयन् साहित्यदर्पणकाराचार्यविश्वनाथकविराजः वदति, अत्र दोषरहितस्यैव यदि काव्यत्वं स्वीक्रियते तर्हि एतत्तु चिन्त्यमेव । यतो हि-

"न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।
धिग्धिक्छत्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छुनैः किमेभिर्भूजैः" ॥ इति ।
(साहित्यदर्पणः- १.९)

यदि ईषदर्थे नञः प्रयोगो भवति तर्हि-ईषद्दोषौ शब्दार्थौ काव्यम्-इत्युक्ते निर्दोषयोः काव्यत्वं न स्यात् । यदि च ईषद्दोषौ इति स्यात् तर्हि एतदपि काव्यलक्षणे अवाच्यत्वेन परिगण्यते । रत्नादिलक्षणे कीटानुवेधादि परिहारवत् । किञ्च, शब्दार्थयोः सगुणविशेषणम् अनुपपन्नं भवति । गुणानां रसैकधर्मत्वस्य ये रसस्यांगिनो धर्माः शौर्यादय इवात्मनः इत्यादिना तेनैव प्रतिपादितत्वात् ।
वक्रोक्तिजीवितकारेण आचार्यकुन्तकेन काव्यलक्षणं प्रदत्तमेवं वक्रोक्तिः काव्यजीवितम् । अस्य काव्यलक्षणस्य खण्डनं कृत्वा आचार्यविश्वनाथकविराज आह-वक्रोक्तिस्तु अलंकारः, अतः कटक-कुण्डलादिवत् अलंकाराः काव्यस्य आत्मारूपेण न प्रकाशितो भवितुमर्हति ।
आचार्य भोजः स्वकीये काव्यशास्त्रीयग्रन्थे सरस्वतीकण्ठाभरणे काव्यं परिभाषयन् लिखति –

"अदोषं गुणत्काव्यमलंकारैरलंकृतम् ।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति" ॥ इति ।

अत्र सरस्वतीकण्ठाभरणकारस्य काव्यलक्षणं खण्डयन् आचार्यविश्वनाथः वक्ति, दोषगुणादिकानां काव्यस्वरूपे निवेशाभावात् अदोषं गुणवत्काव्यम्- इति भोजराजस्य काव्यलक्षणं न युक्तियुक्तम् ।
अतः परं काव्यस्य आत्मा ध्वनिः इति आनन्दवर्धनाचार्यस्य लक्षणखण्डने व्रती बभुव आचार्यविश्वनाथः । तत्र तेन युक्तिपूर्णतया आह, यदि ध्वनिः वस्त्वलंकाररसादिलक्षणस्त्रिरूपो भविष्यति काव्यस्य आत्मा तदा प्रहेलिकादौ अतिव्याप्तिः भविष्यति । अत्र वस्तुमात्रव्यङ्गत्वे सति कथं काव्यव्यवहारः, -वस्तुमात्रव्यङ्गत्वे सति यदि काव्यत्वं सिद्धति तर्हि 'राजा देवदत्तो ग्रामं याति'-इत्यस्मिन् वाक्ये तद्भृत्यस्य तदनुसरणरूपव्यंग्यावगतेरपि काव्यत्वं स्यात् । यदि काव्यत्वमस्ति तर्हि तन्न युक्तियुक्तम्, यतो हि वाक्येऽस्मिन् रसात्मकता नास्ति । काव्येन प्रेषिता वार्ता रामादिवत् भवेत् न तु रावणादिवत् । अपि च यथोक्तम् आग्नेयपुराणे-

"वाग्वैदग्धप्रखानेऽपि रस एवात्र जीवितम्" ॥ इति |
एवं प्रकारेण काव्यलक्षणवियकानि पूर्वाचार्यानां मतानि युक्तिपूर्णतया खण्डनं कृत्वा आचार्यविश्वनाथः दर्शयति यत् रससमन्वितं वाक्यमेव काव्यस्य मुख्यमुपादेयम् ।

### स्वमतप्रतिस्थापनम्

"वाक्यं रसात्मकं काव्यम्" ॥ इति । (साहित्यदर्पणः- १.२३)
श्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्यार्णवकर्णधार-महापात्र-श्रीविश्वनाथकविराजेन साहित्यदर्पणग्रन्थे पूर्ववर्तिनामालंकारिकाणां विस्तृतं काव्यलक्षणं समालोच्य तत् खण्डनं कृत्वा स्वकीयं संक्षिप्रं काव्यस्वरुपं प्रातिपादनेन काव्यजगति नवीनसन्देशं प्रयच्छति । तन्नये, रसात्मकत्वे

सति वाक्यत्वं काव्यपदवाच्यत्वेन परिगण्यते । यस्मिन् वाक्ये रस आत्मारुपेण तिष्ठति तदेव काव्यं भवेत् । सुष्ठतया यदि विश्वनाथकृतकाव्यलक्षणं विचार्य्यते तर्हि दृश्यते, अत्र विविधाः लक्षणीयविषयाः वर्तन्ते, यथा- वाक्यं भवेत्, तत् वाक्यं रसयुक्तं भवेत् पुनश्च वाक्येषु रसस्य अवस्थानं मुख्यतया साररूपतया वा विश्वनाथकविराजमहोदयस्य मुख्यं वक्तव्यमेवं यत्, रसे एव काव्यस्य आत्मा अस्ति। रसं विना काव्यस्य काव्यत्वं नैव सिद्धति । लक्षणं यदि केवलं 'वाक्यं काव्यम्' इत्येवं स्यात् तर्हि दोषो भवति अपितु काव्यस्य वैशिष्ट्यं न प्रकाशितं भवेत्। यदि उच्यते 'वाक्यं काव्यम्' तर्हि वेदादिवाक्यमपि काव्यं भवेत्। तन्निरसनाय विश्वनाथेन उक्तम्-

"चतुर्वर्गफलप्राप्तिर्हि वेदशास्त्रेभ्यो नीरसतया दुःखादेव परिणतबुद्धीनामेव जायते" ॥ इति । अस्मात् ज्ञायते यत्, परिणतवुद्धिसम्पन्नाः जना एव काव्याध्ययने अधिकरिणः । तर्हि सुकुमारबुद्धिवालकानां को दोषः? किं ते काव्यपाठे आयोग्याः? यदि वा ते काव्यपाठे योग्याः भवेयुः तर्हि नीरसवाक्ययुक्तं काव्यपाठं कृत्वा ते तस्मिन् काव्यविषये सठिकतया ज्ञानान्वेषणं कर्तुं पारयामः किम् ?- चेत्यादयः प्रश्ना उद्भास्यन्ते।

एतादृशस्य विध्नस्य समाधानार्थं विश्वनाथेन काव्यलक्षणे 'रसात्मकम्'-इति पदमुल्लिखितम् । काव्यं यदि रसात्मकं न स्यात् , तर्हि तस्मिन् काव्यपाठे पाठकानाम् अनीहारुपा हृदयवृत्ति उद्भास्यते । तर्हि काव्यस्य सार्थकता कुत्र ? काव्यपाठेन तस्मात् काव्यात् यदि पाठकाः रसास्वादने असमर्थाः भवेयुः , तर्हि केनोपायेन तत्काव्यमुत्कृष्टं भवेत् सुहृत्समाजे ? - एवमेव वहवः प्रश्नाः सञ्चायन्ते । अपि च वाक्यं यदा रसात्मकं भवति तदा तत्र काव्यत्वं भवत्येव । यत्र तु न रसात्मकत्वं तत्र नैव काव्यत्वम् ।

किञ्च, ये खलु परिणतबुद्धिसम्पन्नाः जनाः, तेऽपि काव्येषु रसस्य अन्वेषणं कुर्वन्ति । परन्तु तत्कथम् ? तस्य प्रत्युत्तरं ददाति विश्वनाथाचार्यः -

"कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात्" ॥ इति ।

- उपसंहारः -

लक्षणस्य यथार्थताविचारः -

कविसूक्तिरत्नाकरेण विश्वनाथेन प्रणीतस्य काव्यलक्षणस्य यौक्तिकता अस्ति न वेत्यस्मिन् विषये वयमधुना विचारः करिष्यामः ।

काव्यस्य लक्षणं कर्तुं प्रवृत्तः सन् आचार्यः विश्वनाथ आह –

"वाक्यं रसात्मकं काव्यम्" ॥ इति ।

अर्थात् लक्षणमिदं प्रमाणं करोति यद्, केवलं विश्वनाथेनैव रसस्य प्राधान्यं दीयते काव्यलक्षणे, अन्ये तु न । इदं लक्षणमयौक्तिकम् इति केषाञ्चिन्मतम् । एषु लक्षणेषु दोषोऽस्ति इति केषाञ्चिदालङ्कारिकानां मतम् । केचन दर्शयन्ति इदं लक्षणम् अव्याप्तिदोषदुष्टम् । केचन वदन्ति अस्मिन् लक्षणे अतिव्याप्तिदोषो वर्तते । तेषु केचिच्च रसात्मकं वाक्यं काव्यपदवाच्यम् इति विश्वनाथमतं न स्वीकुर्वन्ति । एवमेव विविधं मतविरोधं विद्यते । यदि सम्यक्तया काव्यशास्त्रसमन्वितं ग्रन्थसमूहम् अथवा काव्यस्य समुद्रं मन्थनं क्रियते तर्हि दृश्यते यद् सर्वे एव काव्यशास्त्रकाराः, साहित्यकाराः, आलंकारिकाश्च काव्यनिरूपणे रसस्य प्राधान्यातिशय्यं स्वीकुर्वन्ति । एतद्विषये कतिपयानि दृष्टान्तानि उल्लिख्यन्तेऽधः-

"नियतिकृतनियमरहितं ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरूचिरां निर्मितिमादधती भारती कवेर्जयति॥"इति ।
(काव्यप्रकाशः- १.१)

अर्थात् या काव्यवाणी नियतिकृतनियमरहिता, स्वतन्त्रा, नवरसानाम् उत्सरूपेण उपभोगयोग्या च तस्यैव विजयप्राप्तिर्भवति । अस्मिन् उदाहरणे मम्मटाचार्येण रसस्य प्रसङ्गमुल्लिखितम् । मतमिदं सरलतया विश्वनाथकविप्रवरेण निगदितम् – 'वाक्यं रसात्मकं काव्यम्' इति ।

अलंकारसूत्रकाराचार्यशौद्धादनिकेनोक्तम्- "रसादिमद् वाक्यं काव्यम्" ||

सरस्वतीकण्ठाभरणे भोजराजेन कथितं एवं च गुणालङ्काररससमन्वितस्य काव्यस्य प्रशंसाकृता-

"निर्दोषं गुणवत् काव्यं अलङ्कारैरलङ्कृतम् ।
रसान्वितं कविः कुर्वन् कीर्तिः प्रीतिञ्च विन्दति ॥" इति ।
(सरस्वतीकण्ठाभरणम्- १.२)

काव्यमीमांसायामपि दृश्यते यत्, तत्र काव्यपुरुषस्य देहवर्णनाप्रसङ्गे राजशेखरेण मतस्यैकस्य पोषणं कृतम् । तत्र तेनोक्तम् -"शब्दार्थौ ते शरीरं...रस आत्मा..."(काव्यमीमांसा-३.२) इत्यादयः । आचार्यभरतमुनिरपि स्वकीयनाट्यशास्त्रस्य षष्ठाध्याये एवमाह-

“न हि रसादृते कश्चिदर्थः प्रवर्तते” ॥ इति | (नाट्यशास्त्रम् - ६.३१)
अर्थात् रसं विना कश्चिदर्थोऽपि न प्रवर्तयितुं शक्नोति । अर्थात् भरताचार्योऽपि रसस्यैव प्राधान्यं उररीकृतवान् । परिशेषे वक्तुं शक्यते यत्, सर्वे एव कविवर्गाः लेखकाश्च तेषां लेखण्यां तथा काव्येषु रसस्य प्राधान्यं दीयते स्वीक्रियते च । परन्तु तद् गौणतया । केवलं सर्वादौ कविप्रवरविश्वनाथमहोदयेन रसं काव्यस्यात्मारूपेण मुख्यतया सुप्रतिष्ठितम्, इति शम् ।

## ग्रन्थमाला


1. साहित्यदर्पणः - विद्यावाचस्पतिसाहित्याचार्यशालिग्रामशास्त्रिविरचितया (विमलाख्यया हिन्दीव्याख्यया विभूषितः) - मोतीलालवनारसीदास, (दिल्ली, मुम्बइ, चेन्नइ, कोलकाता, वंगालुरु, वाराणसी, पाटना) - २०१६.
2. काव्यमीमांसा का शास्त्रीय अध्ययन - अध्यापक ड. श्रीविमलकान्त मुखोपाध्याय - पुस्तकश्री - कलिकाता - १३७६, १३इ जैष्ठ्य.
3. Krishnamoorthy Dr. K. Essays in Sanskrit Criticism. Dharwad: Karnatak University, 1977.
4. भरत नाट्यशास्त्र - ड.सुरेशचन्द्र वन्द्योपाध्याय - नवपत्र प्रकाशन - कलिकाता - २००९.
5. काव्यमीमांसा - ड. सीतानाथ आचार्य शास्त्री ओ ड. देवकुमार दास - सदेश - कलकाता - २०१६.